जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरं त ऊचुः— अनेनैव जरद्गवेनास्माकं शावकाः खादिता इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः। अतोऽहं ब्रवीमि—अज्ञातकुलशीलस्य इत्यादि॥ इत्याकर्ण्य स जम्बुकः सकोपमाह— मृगस्य प्रथमदर्शनदिने भवानपि अज्ञातकुलशील एव । तत्कथं भवता सह एतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते ।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ ६९ ॥

अन्यच्च ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ ७० ॥

यथा चायं मृगो मम बन्धुस्तथा भवानपि । मृगोऽब्रवीत्—किमनेन उत्तरोत्तरेण सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् । यतः—

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ७१ ॥

काकेनोक्तम्—एवमस्तु । अथ प्रातः सर्वे यथाभिमतदेशं गताः ।

एकदा निभृतं शृगालो ब्रूते—सखे, अस्मिन्वनैकदेशे सस्यपूर्ण—क्षेत्रमस्ति । तदहं त्वां नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति । अथ क्षेत्रपतिना तद्दृष्ट्वा पाशो योजितः । अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत्—को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः ।

अत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्—फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः। एतस्योत्कृत्यमानस्य मांसासृग्लिप्तानि अस्थीनि मया अवश्यं प्राप्तव्यानि । तानि च बाहुल्येन मम भोजनानि भविष्यन्ति ।